मध्यमकौशिकी । प्रौढार्थकोमलैर्बन्धैर्मध्यमारभटीष्यते । ४

५ छाया । अन्योक्तीनामनुकृतिश्छाया सापीह षड्विधा । लोकच्छेकार्भकोन्मत्तप्रौढ़ामत्तोक्तिभेदतः" । ५

६ मुद्रां । "स्वाभिप्रायस्य वाक्ये यद्वचसापि निवेदनम् । मुद्रां तां मुत्प्रदायित्वात् काव्यमुद्राविदो विदुः । साक्षिन् पदस्य वाक्यस्य विभक्तेर्वचनस्य च । समुच्चयस्य संवृत्त्या षोढ़ा न्यासेन जायते" । मुद्रा ६

७ उक्तिः । "विधिद्वारेण वा यत्र निषेधेनाथवा पुनः । प्रतीयते विशिष्टोऽर्थः सोक्तिरत्राभिधीयते । विधेरथ निषेधात् स्यादधिकारात् विकल्पनात् । नियमात् परिसंख्याया उपाधेः सेह षड् विधा" । उक्तिः ७

८ युक्तिः । 'अयुज्यमानस्य मिथः शब्दस्यार्थस्य वा पुनः । योजना क्रियते यासौ युक्तिरित्युच्यते बुधैः । पदं चैव पदार्थश्च वाक्यं वाक्यार्थ एव च । विषयोऽस्याः प्रकरणं प्रबन्धश्चाभिधीयते । योगकारणपर्य्यायाङ्गाङ्गिभावपरम्पराः । पदयुक्तेर्निमित्तं स्युर्निरूढ़ाः पदसिद्धये । विरुद्धानां पदार्थानां गत्यादीनां परस्परम् । योजनायेह तां युक्तिं पदार्थविषयां विदुः । गर्भः सह निगर्भेण संवृत्तिः समसञ्जसा । हेतवो वाक्ययुक्तीनां क्रियन्तामेवमादयः । यत्तदादेरुपादानं क्रियाभ्याससमुच्चयौ । क्रियासमभिहारश्च वाक्यार्थान् युञ्जते मिथः । यदश्वङ्केयशैलादिवर्णनाभ्युपपत्तये । वाक्यं सेह प्रकरणविषया युक्तिरिष्यते प्रबन्धविषयाप्येवं युक्तिरुक्ता मनीषिभिः" । युक्तिः ८

९ भणितिः । "उक्तिप्रकारो भणितिः सम्भवेऽसम्भवे च सा । विशेषसंवृत्त्याश्चर्य्यकल्पनासु च कल्पते" । भणितिः ९

१० गुम्फना । 'वाक्ये शब्दार्थयोः सम्यग्रचना गुम्फना स्मृता । शब्दार्थसमपर्य्यायपदवाक्यकृता च सा" । गुम्फना १०

११ शय्या । "शय्येत्याहुः पदार्थानां घटना या परस्परम् । सा प्रक्रान्तेन कस्मिंश्चिदप्रक्रान्तेन कुत्रचित् । अतिक्रान्तेन कुत्रापि यथार्थवर्ण्ययोः क्वचित् । क्वचित् वाच्यार्थयोः क्वापि प्रकीर्णानां च दृश्यते" । शय्या ११

१२ पठितिः "काकुस्वरपदच्छेदभेदाभिनयकान्तिभिः पाठोयोऽर्थविशेषाय पठितिः सेह षड् विधा" । पठितिः १२

१३ यमकम् । "विभिन्नार्थकरूपाया याऽवृत्तिर्वर्णसंहतेः । अव्यपेतव्यपेतात्मा यमकं तन्निगद्यते । तदव्यपेतयमकं व्यपेतयमकं तथा । स्थानास्थानविभागाभ्यां पादभेदाच्च भिद्यते । तत्र पादादिमध्यान्तस्थानान्तेषु प्रकल्प्रते । यदव्यपेतमन्यद्वा तत्स्थानयमकं विदुः । चतुस्त्रिद्व्येकपादेषु यमकानां विकल्पना । आदिमध्यान्तमध्यान्तमध्याद्याद्यन्तसर्व्वतः । अत्यन्तं बहवस्तेषां भेदाः संभेदयोनयः सुकरा दुष्कराश्चैव," अग्निपुराणे तु । अनेकवर्णावृत्तिर्या भिन्नार्थप्रतिपादिका । यमकं सा व्यपेत चाव्यापेतेति द्विधा मता । आनन्तर्य्यादपेता स्यात् व्यपेता व्यवधानतः । द्वैविध्येनानयोः स्थानपादभेदाच्चतुर्विधम् । आदिपादादिमध्यान्तेष्वेकद्वित्रिनियोगतः । सर्व्वथा पूर्व्वपूर्व्वेण चेत्यादिनोत्तरोत्तरम् । एकद्वित्रिपदारम्भात्तत्पादात्तद्रूपदात् परम् । तृतीयं त्रिविधं पादस्यादिमध्यान्तगोचरम् । पादान्तयमकं चैव कोष्ठीयमकमेव च । संसर्गयमकं चैव विक्रान्तयमकं तथा । यमकं चक्रबालं च संदष्टयमकं तथा । पादादियमकं चैव तत्तु मैत्रीयमेव च । दशधा यमकं श्रेष्ठं तद्भेदाबहवोऽपरे" इत्युक्तम् । तत्रास्थानयमकमुक्तं "नादौ न मध्ये नान्ते यत् सन्धौ वा यत् प्रकाशते । अव्यपेतव्यपेतं तदस्थानयमकं विदुः । पादे श्लोके च तत्प्रायः पादसन्धौ च बध्यते । स्वभेदे च चान्यभेदे च स्थूलं सूक्ष्मं च सूरिभिः" । अन्यदग्निपुराणादौ ज्ञेयम् । यमकम् १३

१४ श्लेषः "एकरूपेण वाक्येन द्वयोःस्वारणमर्थयोः । तन्त्रेण यत् स शब्दज्ञैः श्लेष इत्यभिधीयते । प्रकृतिप्रत्ययोत्थौ द्वौ विभक्तिवचनाश्रयौ । पदभाषोद्भवौ चेति शब्दश्लेषा भवन्ति षट्" । १४ श्लेषः

१५ अनुप्रासः । "आवृत्तिर्या तु वर्णानां नातिदूरान्तरस्थिता । अलङ्कारेषु विद्वद्भिरनुप्रासः स दृश्यते" "श्रुतिभिर्वृत्तिभिर्वर्णैः पदैर्नामभिरुक्तिभिः । लाटानामुक्तिभिश्चायं षट्प्रकारः प्रकाशते" तत्र श्रुत्यनुप्रासः १७८पृष्ठे दर्शितः । स च त्रिविधः ग्राम्योनागर उपनागरश्चेतिभेदात् । ग्राम्योऽपि चतुर्विधः मसृणोऽमसृणो वर्णोत्कटो वर्णानुत्कटश्चेति भेदात् । वृत्त्यादीनां लक्षणानि तत्रैव । "मुहुरावर्त्त्यमानेषु यः स्ववर्गेषु वर्त्तते । काव्यव्यापी स संदर्भो वृत्तिरित्यभिधीयते । कार्णाटी कौन्तली कौङ्की कौङ्कणी वानवासिका । द्राविड़ी माथुरी मात्सी मागधी ताम्रलिप्तिका । औड्री पौण्ड्रीति विद्वद्भिः सा द्वादशविधोच्यते" । तत्र कवर्गेणानुप्रासवती कार्णाटी एवं चवर्गेण कौन्तली, टवर्गेण कौङ्की, तवर्गेण कौङ्कणी, पवर्गेण वानवासिका, यवर्गेण, द्राविडी । शवर्गेण माथुरी, द्वित्रिवर्गानुप्रासवती मात्सी । द्वाभ्यां गर्भितैककवर्गानुप्रासवती मागधी । स्वान्त्यसंयोगिकवर्गानुप्रासवती ताम्रलिप्तिका ।